श्री कुमारी स्तोत्रं

श्री कुमारी स्तोत्रं

जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि |
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते || 1 ||

त्रिपुरां त्रिगुणाधारां त्रिवर्गज्ञानरूपिणीं |
त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहं || 2 ||

कलात्मिकां कलातीतां कारुण्यहृदयां शिवां |
कल्याणजननीं देवीं कल्याणीं पूजयाम्यहं || 3 ||

अणिमादिगुणाधरामकाराद्यक्षरात्मिकां |
अनंतशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहं || 4 ||

कामचारीं शुभां कांतां कालचक्रस्वरूपिणीं |
कामदां करुणोदारां कालिकां पूजयाम्यहं || 5 ||

चंडवीरां चंडमायां चंडमुंडप्रभंजिनीं |
पूजयामि सदा देवीं चंडिकां चंडविक्रमां || 6 ||

सदानंदकरीं शांतां सर्वदेवनमस्कृतां |
सर्वभूतात्मिकां लक्ष्मीं शांभवीं पूजयाम्यहं || 7 ||

दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीं |
पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीं || 8 ||

सुंदरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीं |
सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहं || 9 ||

इति श्री कुमारी स्तोत्रं |